# संस्कृत-प्रभातम्



।। प्रार्थना।।

**सर्वे ह्यमी विधिकरास्तव सत्त्वधाम्नो ब्रह्मादयो वयमिवेश न चोद्विजन्त:।**

**क्षेमाय भूतय उतात्मसुखाय चास्य विक्रीडितं भगवतो रुचिरावतरौ:।।७.९.१३.।।**

## संस्कृत- प्रभातम् सङ्घ


**प्रमुख-मार्गदर्शक:**

प. पू. भक्तिरसामृत स्वामी

**मार्गदर्शक:**

बालगोविंद दास:

**सम्पादकप्रकाशकौ मुद्रकौ च**

धीरशांत दास:

कनाई कृष्ण दास:

**सदस्या:**

श्यामलीला दास:

पोकळे नीरज:

कुलकर्णी सागर:

पाण्डे अभिषेक:

जय गोपाल दास:

अजयगौराङ्ग दास:

ऐश्वर्या सुन्दरी देवी

शोभा लक्ष्मी देवी


## अनुक्रमणिका


प्रार्थना............................१

संकेत...............................२

सम्पादकीयम्.......................३

सम्भाषणम्.........................४

कथा................................५

शब्दसङ्ग्रह:,पदरञ्जनी ........६

सुभाषितम्.........................७



प्रकाशनं मुद्रणं च संकेत-

पाक्षिक- संस्कृतप्रभातम्, इस्कान, हरे कृष्ण चौक,

५० गोकुलनगरे कोंढवा - पुणे-४८

विद्युत/अणुपत्रम् संकेत

sanskritprabhatam@gmail.com, d16108@gmail.com

भ्रमणध्वनी-८८८८८४४६४८

# सम्पादकीयम्

गतसप्ताहे श्रीनृसिंहदेवस्य प्राकट्यदिनमहामहोत्त्सव: आसीत् । एषः दिनः नृसिंह चतुर्दशी नाम्ना विख्यातः ।सर्वेषु इस्कॉनमन्दिरेषु तथा अन्यत्रापि एतस्मिन् दिने विविधाः उत्सवकार्यानि सन्ति। नृसिंहावतारः बहु अद्भुतः । बहवः जनाः नृसिंहस्य रूपम् उग्रं भयंकरंच अस्ति इति प्रश्नेन भ्रामिताः भवन्ति। विविधेषु धर्मेषु ईश्वरः करुणामय: स्निग्धः च अस्ति तथा सर्वेषां जनानां कल्याणं करोति इति सत्यं वारंवारं वदितम्। अतः नृसिंहस्य एनम् उग्ररूपं अज्ञजनाः तं क्रूरं भीषणं वदति। भगवान् शिवः वक्षस्थले मुण्डमालां धारयति। किन्तु नृसिंहदेवस्य माला कीदृशा ? तस्य माला हिरण्यकश्यपो: आन्त्रानि ! अतेव नृसिंहस्य तत्त्वतः ज्ञानम् आवश्यकम्।

नृसिंहस्य भीषणरूपस्य कार्याणां प्रयोजनं किम् ? तस्य प्रल्हादस्य कृते प्रेम । नृसिंहस्य क्रोधस्य कारणं हिरण्यकश्यपो: प्रल्हादं प्रति श्त्रुत्वं ।प्रल्हाद: महाभागवतः। किन्तु असुरनरेश: हिरण्यकश्यपु प्रल्हादस्य वधार्थं विविधाः उपायाः कृतवान्। प्रल्हादस्य रक्षणार्थं देवजनापि न आगतवन्तः । अतः भगवतः क्रोधः हिरण्यकशिपौ तथा देवजनेषु अपि आसीत्। अनेन क्रोधेन नृसिंहस्य रूपं भयङ्करं भिषणंच। श्रीमन् श्रीधरस्वामि तस्य भावार्थदीपिकायां लिखति - उग्रोऽप्यनुग्र एवायं स्वभक्तानां नृकेशरी। केसरीव स्वपोतानाम् अन्येषामुग्रह ।।७.९.१.।।

अत्र नृसिंहस्य भक्तवात्सल्यं केवलं प्रल्हादस्य कृते न किन्तु भगवतः ब्रह्मणः कृते अपि। सः हिरण्यकशिपुं वरं दत्तवान्। अनेन वरेण हिरण्यकशिपु मत्तः अभवत्। किन्तु नृसिंहदेव: ब्रह्मणः वरान् असत्यं न कृत्वा अवतारितः अभवत्। सः तस्य वरानाम् अनादरः न कृतवान्। अतः नृसिंहस्य रूपम् अद्भुतम्।

इद्रस्य वज्रः विशालान् पर्वतान् धुलीकणा: करोति। एषः वज्रस्य बलः। किन्तु सः हिरण्यकशिपुं न हन्तुं अशक्नोत्। किन्तु नृसिंहदेवस्य करकमलस्य नखानि हिरण्यकशिपोः वक्षं लीलया अदारयन् ।अतः वयं नृसिंहस्य आश्रयग्रहणं करणीयम्। अस्माकं भक्तिमार्गे विविधानि विघ्नानि हिरण्यकशिपु इव सन्ति, किन्तु नृसिंहदेव: भक्तिविघ्नविनाशक अस्ति। श्रीशङ्कराचार्यः करावलम्ब स्तोत्रे लिखति - अन्धस्य मे हुतविवेकमहाधनस्य चौरैः प्रभो बलिभिरिन्द्रिय नामधेयैः। मोहान्धकुपकुहेरे विनिपातितस्य लक्ष्मीनृसिंह मम देही करावलम्बम्।।

।। जयतु जयतु नृसिंह ।।

# सम्भाषणम्

मोहन: - श्याम ! शीघ्रम् शरदं आव्हयतु ।

श्याम: - अद्य शरदः नागतवान् । 'सः वृन्दावनं गतवान्' ।

मोहनः - ह्यः उद्यनतः फलम् आनीतवान् किम् ?

श्यामः - आम् । ह्यः अहं रमेशः च उद्यानं गतवन्तौ । फलम् आनितवन्तौ अपि ।

मोहनः - ह्यः सर्वे किं किं कार्यं कृतवन्तः ?

श्यामः - ह्यः रामः जपं समापितवान् , गीता मन्त्राणि लिखितवती , गोपालः कार्याणि परिशीलितवान् । ह्यः राधिका नागतवति । मुकुन्दः स्वच्छीकृतवान् ।

मोहनः - राधिका कुत्र गतवती इति कोऽपि जानाति ?

श्यामः - राधिका तीव्रम् अस्वस्था इति शृणुमः ।

मोहनः - सा औषधं स्विकृतवति स्यात् खलु ?

श्यामः - वैद्यः सुच्यौषधं दत्तवान् इति श्रुतम् । ह्यः ललिता आगतवत्यः । भवान् न आसीत् । अतः एकं पत्रं दत्तवत्यः ।

मोहनः - विशाखा आगतवती किम् ?

श्यामः - आम् , आगतवती । 'भवान् आगच्छतु ' इति उक्तवती ।

मोहनः - भवतु , भवान् गच्छतु ।



## महाचतुरकाख्य-शृगाल-कथा



आसीत् कस्मिन्श्चित् वनोद्देशे महाचतुरको नाम शृगालः। तेन कदाचित् अरण्ये स्वयं मृतो गजः समासादितः। तस्य समन्तात् परिभ्रमति परं कठिनां त्वचं भेत्तुं न शक्नोति। अथ अत्र अवसर इतश्चेतश्च विचरन् कश्चित् सिंहः तत्रैव प्रदेशे समाययौ। अथ सिंहं समागतं दृष्ट्वा स क्षितितलविन्यस्त मौलिमण्डलः संयोजितकरयुगलः सविनयमुवाच- “स्वामिन्! त्वदीयोऽहं लागुडिकः स्थित: त्वदर्थे गजमिमं रक्ष्यामि। तदेनं भक्षयतु स्वामी”। तं प्रणतं दृष्ट्वा सिम्हः प्राह-भोः ! न अहमन्येन हतं सत्तवं कदाचिदपि भक्षयामि। तत् तव एव गजोऽयं मया प्रसादीकृतः।





तच्छ्रुत्वा शृगालः सानन्दमाह -युक्तम् इदं स्वामिनो निजभृत्येषु। उक्तञ्च यतः-

अन्त्यावस्थोऽपि महान्स्वामिगुणान्न जहाति शुध्दतया। न श्वेतभावमुज्झति शंखः शिखिभुक्तमुक्तोऽपि ॥



अथ सिंहे गते कश्चिद् व्याघ्रः समाययौ, तमपि दृष्ट्वा सौ व्यचिन्तयत्। “अहो ! एकस्तावत् दुरात्मा प्रणिपातेन आपवाहितः। तत् कथम् इदानीम् एनमपवाहयिष्यामि? नूनं शुरोऽयं। न खलु भेदम् विना साध्यो भविष्यति।



उक्तम् च यतः- न यत्र शक्यते कर्तुं साम दानमथापि वा। भेदस्तत्र प्रयोक्तव्यो यतः स वशकारकः ॥ किञ्च, सर्वगुणसंपन्नोऽपि बध्यते। उक्तञ्च यतः- अन्तःस्थेन विरुध्देन सुवृतेनातिचारुणा। अन्तर्भिन्नेन संप्राप्तं मौक्तिकेनापि बन्धनम् ॥ एवं संप्रधार्य्य तस्याभिमुखो भूत्वा गर्वात् उन्नतकन्धरः ससंभ्रमम् उवाच,- “माम! कथम् अत्र भवान् मृत्युमुखे प्रविष्टः। येन एष गजः सिंहेन व्यापादितः। स च माम् एतद्रक्षणम्नियुज्य नद्यां स्नानार्थम् गतः। तेन च गच्छता मम समादिष्टं, -यदिकश्चिदिह व्याघ्रः समायाति, त्वया सुगुप्तं मम आवेदनीयम्। येन वनमिदं मया निर्व्याघ्रं कर्तव्यम्। यतः पूर्वं व्याघ्रेण एकेन मया व्यापादितो गजः शून्ये भक्षयित्वा उच्छिष्टतां नीतः। तद्दिनात् आरभ्य व्याघ्रान् प्रति प्रकुपितोस्मि।





तच्छ्रुत्वा व्याघ्रः सन्त्रस्तः तमाह- भो भागिनेय! देहि मे प्राणदक्षिणाम्। त्वया तस्यात्र चिरायायातस्यापि मदीया कापि वार्ता न आख्येया। एवमभिधाय सत्वरं पलायाञ्चक्रे। अथ गते व्याघ्रे तत्र कश्चित् द्वीपी समायातः। तमपि दृष्ट्वा असौ व्यचिन्तयत् - “दृढदन्ष्ट्रोयं चित्रकः। तदस्य पार्श्वादस्य गजस्य यथा चर्मच्छेदो भवति तथा करोमि”। एवं निश्चित्य तमपि उवाच- “भो भगिनीसुत! किमिति



चिरात् दृष्टोऽसि? कथञ्च बुभुक्षित इव लक्ष्यसे ? तत् अतिथिरसि मे । एष गजः सिंहेन हतः तिष्ठति। अहं च अस्य तत् आदिष्टो रक्षापालः। परं तथापि यावत् सिंहो न समायाति, तावत् अस्य गजस्य मांसं भक्षयित्वा तृप्तिं कृत्वा द्रुततरं व्रज ।



स आह - "माम ! यदि एवं तत्र न कार्यं मे मांसाशनेन, यतो जीवन्नरो भद्रशतानि पश्यति । उक्तञ्च - यच्छक्यं ग्रसितुं प्रासं ग्रस्तं परिणमेच्च यत् । हितञ्च परिणामे यत्तदद्यं भूतिमिच्छता ।। तत् सर्वथा तदेव भुज्यते यदेव परिणमति। तत् अहमितोऽपि अयास्यामि" ।



शृगाल आह - भो अधीर! विश्रब्धो भूत्वा भक्षय त्वम्। तस्यागमनं दुरतोऽपि तव अहं निवेदयिष्यामि । तथानुष्ठिते द्वीपिना भिन्नां त्वचं विज्ञाय जंबूकेनाभिहितम् - भो भगिनी- सुत! गम्यताम् । एष सिम्हः समायाति।

तच्छ्रुत्वा चित्रको दूरम्प्रणष्टः। अथ यावदसौ तदभेदकृतद्वारेण किञ्चिन्मांसं भक्षयति, तावत् अतिसंकृध्दोपर शृगालः समाययौ । अथ तम् आत्मतुल्यपराक्रमं दृष्ट्वा एनं श्लोकमपठत - उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् । निचमल्पप्रदनेन समशक्तिं प्राक्रमेः ।। तदभिमुखकृतप्रयाणः स्वदंष्ट्राभिः तं विदार्य्य दिशो भागं कृत्वा स्वयं सुखेन चिरकालं हस्तिमांसं बुभुजे ।एवं त्वमपि तं रिपुं स्वजातीयं युध्देन परिभूय दिशो भागं कुरु। नो चेत् पश्चात् बध्दमुलात् अस्मात् त्वमपि विनाशम् अवाप्स्यसि । ****

## पदरञ्जनी

**दिङ्गतसमाः शब्दाः -** १. विगता नासिका यस्य। नासिका नास्ति सः । ५. मर्कटः । ६. निरामयाः , सम्यक आरोग्यं अस्ति सः । ७. एतत् वृक्षेषु लघु रक्तवर्णं फलानि सन्ति । ८. एकः युगस्य नामम् । ९. नष्टः भवति । ११. स्त्री ।

**ऊर्ध्वाः शब्दाः -** १. नमन समय वक्र भवति सः । २. गर्दभः। ३. संभाषणम् । ५. वृत्तम् । ७. ऋषभः, एषः कृषिं साह्यं करोति । ९. विश्वः, स्वर्गादि । १०. वसन्त ...... यति चम्पकम् , पत्रम् । १२. श्रवण इद्रियम् ।

**२०.पदरञ्जन्या: उत्तरम्**

| | | | | | |
|---|---|---|---|---|---|
| १ नृ | | २ का | म | धे | ३ नू |
| ४ प | र | म | | | ति |
| | ५ प्र | दे | ६ श | | |
| ७ ऐ | रा | व | त | | ८ ना |
| क्ष | | | | ९ प | र |
| १० व | टि | का | | य | द |

**२१ पदरञ्जनी**

| | | | | | |
|---|---|---|---|---|---|
| | १ | २ | | ३ | ४ |
| ५ | | | | ६ | |
| | | | ७ | | |
| | | ८ | | | |
| ९ | १० | | ११ | | १२ |
| १३ | | | | | |

भोःवैद्यः शीघ्रं करोतु! इदानी तस्य भोजनं समय अस्ति !




## सुभाषितम्

**लङ्घितं चावलीढं च कलिपुर्वं च यत् कृतम् ।**

**रजस्वालभिदृष्टं च तं भागं रक्षसां विदुः ।।महा.अनु.प.२३.४.।।**

अनुवादः - यः भोजनं कोऽपि लङ्घितवान् , अस्वादितवान् , कलाहानन्तरं पचितवान्, यस्मिन् रजस्वाला दृष्टवान् तत् भोजनं असुरस्य भोजनम् इति मन्येते ।